| 2 | अविरोधः | 8 | 4 | | 67 | 7 (32) | इन्द्रियाधिकरणं | 283 | 15 | 1 | त इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात् । | | सि | मुख्यप्राणव्यतिरिक्तान्येव इन्द्रियाणि । |
| | | | | | | | | 284 | 16 | 2 | भेदश्रुतेर्वैलक्षण्याच्च । | | | |
| | | | | | 68 | 8 (33) | संज्ञामूर्तिकॢप्त्यधिकरणं | 285 | 17 | 1 | संज्ञामूर्तिकॢप्तिस्तु त्रिवृत्कुर्वत उपदेशात् । | (छा 6.3.2) | | त्रिवृत्करणसमानकर्तृकं |
| | | | | | | | | 286 | 18 | 2 | मांसादि भौमं यथाशब्दमितरयोश्च । | | | नामरूपव्याकरणं न चतुर्मुख |
| | | | | | | | | 287 | 19 | 3 | वैशेष्यात्तु तद्वादस्तद्वादः ॥ | | | कर्तृकं, अपितु परमात्मकर्तृकं । |
| 3 | उपासना (साधनं) | 9 | 1 | वैराग्यपादः (जीवगतदोषाः) | 69 | 1 | तदन्तरप्रतिपत्त्यधिकरणं | 288 | 1 | 1 | तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्यां । | (छा 5.3, 5.9) | | |
| | | | | | | | | 289 | 2 | 2 | त्र्यात्मकत्वात्तु भूयस्त्वात् । | | | |
| | | | | | | | | 290 | 3 | 3 | प्राणगतेश्च । | | | देहान्तरं गच्छन् जीवः |
| | | | | | | | | 291 | 4 | 4 | अग्न्यादिश्रुतेरिति चेन्न भाक्तत्वात् । | | पू/सि | भूतसूक्ष्मैः संसृष्ट एव |
| | | | | | | | | 292 | 5 | 5 | प्रथमेऽश्रवणादिति चेन्न ता एव ह्युपपत्तेः । | | " | गच्छति । |
| | | | | | | | | 293 | 6 | 6 | अश्रुतत्वादिति चेन्नेष्टादिकारिणां प्रतीतेः । | | " | |
| | | | | | | | | 294 | 7 | 7 | भाक्तं वाऽनात्मवित्त्वात्तथा हि दर्शयति । | | सि | |
| | | | | | 70 | 2 | कृतात्ययाधिकरणं | 295 | 8 | 1 | कृतात्ययेऽनुशयवान्दृष्टस्मृतिभ्यां यथेतमनेवं च । | (छा. 5.10) | | |
| | | | | | | | | 296 | 9 | 2 | चरणादिति चेन्न तदुपलक्षणार्थेति कार्ष्णाजिनिः । | | पू/सि | स्वर्गात् भोक्तव्यफल |
| | | | | | | | | 297 | 10 | 3 | आनर्थक्यमिति चेन्न तदपेक्षत्वात् । | | " | कर्मसहित एवावरोहति । |
| | | | | | | | | 298 | 11 | 4 | सुकृतदुष्कृते एवेति तु बादरिः । | | सि | |
| | | | | | 71 | 3 | अनिष्टादिकार्यधिकरणं | 299 | 12 | 1 | अनिष्टादिकारिणामपि च श्रुतं । | (कौषी. 1, छा 5.10.3) | पू | |
| | | | | | | | | 300 | 13 | 2 | संयमने त्वनुभूयेतरेषामारोहावरोहौ तद्गतिदर्शनात् । | | " | |
| | | | | | | | | 301 | 14 | 3 | स्मरन्ति च । | | " | |
| | | | | | | | | 302 | 15 | 4 | अपि सप्त । | | " | |
| | | | | | | | | 303 | 16 | 5 | तत्रापि तद्व्यापारादविरोधः । | | " | पापिनां न चन्द्रप्राप्तिः । |
| | | | | | | | | 304 | 17 | 6 | विद्याकर्मणोरिति तु प्रकृतत्वात् । | | सि | |
| | | | | | | | | 305 | 18 | 7 | न तृतीये तथोपलब्धेः । | | | |
| | | | | | | | | 306 | 19 | 8 | स्मर्यतेऽपि च लोके । | | | |
| | | | | | | | | 307 | 20 | 9 | दर्शनाच्च । | | | |
| | | | | | | | | 308 | 21 | 10 | तृतीयशब्दावरोधः संशोकजस्य । | | | |
| | | | | | 72 | 4 | तत्स्वाभाव्यापत्त्यधि. | 309 | 22 | 1 | तत्स्वाभाव्यापत्तिरुपपत्तेः । | (छा 5.10.5) | | जीवस्य आकाशादि साद्दृश्यापत्तिः |
| | | | | | 73 | 5 | नातिचिराधिकरणं | 310 | 23 | 1 | नातिचिरेण विशेषात् । | (छा. 5.10.6) | | आकाशादितः ईषद्विलंबेन निष्क्रमति । |
| | | | | | 74 | 6 | अन्याधिष्ठिताधिकरणं | 311 | 24 | 1 | अन्याधिष्ठिते पूर्ववदभिलापात् । | (छा 5.10.6,7) | | |
| | | | | | | | | 312 | 25 | 2 | अशुद्धमिति चेन्न शब्दात् । | | पू/सि | अन्याधिष्ठितेषु व्रीह्यादि |
| | | | | | | | | 313 | 26 | 3 | रेतःसिग्योगोऽथ । | | सि | शरीरेषु संश्लेषमात्रं । |
| | | | | | | | | 314 | 27 | 4 | योनेः शरीरं । | | " | |
| | | 10 | 2 | उभयलिङ्गपादः (परमात्मगुणाः) | 75 | 1 (7) | सन्ध्याधिकरणं | 315 | 1 | 1 | सन्ध्ये सृष्टिराह हि । | (बृ 6.3.10, कठ 2.5.8) | पू | |
| | | | | | | | | 316 | 2 | 2 | निर्मातारं चैके पुत्रादयश्च । | | " | स्वाप्नसृष्टिः परमात्म |
| | | | | | | | | 317 | 3 | 3 | मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात् । | | सि | कर्तृकैव । |
| | | | | | | | | 318 | 4 | 4 | पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ । | | " | |

"ऊर्ध्वद्रि तत्वातिशङ्करी.." (6,8,26,15)

" दोषाऽदोषौ तृतीये भवभृदितरयोः भक्तिरङ्गानि च.."

"..संसृतौ तन्त्रवाही निर्दोषत्वादिरम्यः बहुभजनपदं स्वाहिकर्मप्रसाद्यः.."

१

| I | II | III | IV | V | VI | VII | VIII | IX | X | XI | XII | | XIII | XIV |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| 3 | उपासना | 10 | 2 | उभयलिङ्गपादः | | | | 319 | 5 | 5 | देहयोगाद्वा सोऽपि । | | सि | |
| | | | | | | | | 320 | 6 | 6 | सूचकश्च हि श्रुतेराचक्षते च तद्विदः। | | | |
| | | | | | 76 | 2 (8) | तदभावाधिकरणं | 321 | 7 | 1 | तदभावो नाडीषु तच्छ्रुतेरात्मनि च । | (छा 8.6.3 6.8.1 बृ 4.1.19) | | समुच्चयेनैव हिता पुरीतत् परमात्मनां जीवसुषुप्तिस्थानत्व |
| | | | | | | | | 322 | 8 | 2 | अतः प्रबोधोऽस्मात् । | | | |
| | | | | | 77 | 3 (9) | कर्मानुस्मृत्यधिकरणं | 323 | 9 | 1 | स एव तु कर्मानुस्मृति शब्द विधिभ्यः। | (छा 8.10.2) | | सुषुप्त एव स्वापादुत्तिष्ठति । |
| | | | | | 78 | 4 (10) | मुग्धाधिकरणं | 324 | 10 | 1 | मुग्धेऽर्धसंपत्तिः परिशेषात् । | | | मूर्छावस्था जाग्रदादिभिन्ना |
| | | | | | 79 | 5 (11) | उभयलिङ्गाधिकरणं | 325 | 11 | 1 | न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि । | (छा 8.1.5) | | |
| | | | | | | | | 326 | 12 | 2 | भेदादिति चेन्न प्रत्येकमतद्वचनात् । | | पू/सि | |
| | | | | | | | | 327 | 13 | 3 | अपि चैवमेके । | | सि | |
| | | | | | | | | 328 | 14 | 4 | अरूपवदेव हि तत्प्रधानत्वात् । | | | |
| | | | | | | | | 329 | 15 | 5 | प्रकाशवच्चावैयर्थ्यात् । | | | |
| | | | | | | | | 330 | 16 | 6 | आह च तन्मात्रम् । | | | तत्तद्देहेष्ववस्थानादपि परमात्मनो न दोषस्पर्शः। |
| | | | | | | | | 331 | 17 | 7 | दर्शयति चाथो अपि स्मर्यते । | | | |
| | | | | | | | | 332 | 18 | 8 | अत एव चोपमा सूर्यकादिवत् । | | | |
| | | | | | | | | 333 | 19 | 9 | अम्बुवदग्रहणात्तु न तथात्वं । | | | |
| | | | | | | | | 334 | 20 | 10 | वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवं दर्शनाच्च । | | | |
| | | | | | | | | 335 | 21 | 11 | प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः। | | | |
| | | | | | | | | 336 | 22 | 12 | तदव्यक्तमाह हि । | | | |
| | | | | | | | | 337 | 23 | 13 | अपि संराधने प्रत्यक्षानुमानाभ्यां । | | | |
| | | | | | | | | 338 | 24 | 14 | प्रकाशादिवच्चावैशेष्यं प्रकाशश्च कर्मण्यभ्यासात् । | | | |
| | | | | | | | | 339 | 25 | 15 | अतोऽनन्तेन तथा हि लिङ्गम् । | | | |
| | | | | | 80 | 6 (12) | अहिकुण्डलाधिकरणं | 340 | 26 | 1 | उभयव्यपदेशात्त्वहिकुण्डलवत् । | | पू | |
| | | | | | | | | 341 | 27 | 2 | प्रकाशाश्रयवद्वा तेजस्त्वात् । | | " | प्रपञ्चः ब्रह्मणः विशेषण-तया अंशभूतः। |
| | | | | | | | | 342 | 28 | 3 | पूर्ववद्वा । | | सि | |
| | | | | | | | | 343 | 29 | 4 | प्रतिषेधाच्च । | | " | |
| | | | | | 81 | 7 (13) | पराधिकरणं | 344 | 30 | 1 | परमतस्सेतून्मानसम्बन्ध भेद व्यपदेशेभ्यः। | (छा 8.4.1 श्वे 6.19,3.9) | पू | |
| | | | | | | | | 345 | 31 | 2 | सामान्यात्तु । | | सि | |
| | | | | | | | | 346 | 32 | 3 | बुद्ध्यर्थः पादवत् । | | | ब्रह्मणः उत्कृष्टं प्राप्यं च अन्यन्न । |
| | | | | | | | | 347 | 33 | 4 | स्थानविशेषात्प्रकाशादिवत् । | | | |
| | | | | | | | | 348 | 34 | 5 | उपपत्तेश्च । | | | |
| | | | | | | | | 349 | 35 | 6 | तथाऽन्यप्रतिषेधात् । | | | |
| | | | | | | | | 350 | 36 | 7 | अनेन सर्वगतत्वमायाम शब्दादिभ्यः। | | | |
| | | | | | 82 | 8 (14) | फलाधिकरणं | 351 | 37 | 1 | फलमत उपपत्तेः। | | | |
| | | | | | | | | 352 | 38 | 2 | श्रुतत्वाच्च । | | | परमात्मैव सकलकर्म-फलप्रदः। |
| | | | | | | | | 353 | 39 | 3 | धर्मं जैमिनिरत एव । | | • | |
| | | | | | | | | 354 | 40 | 4 | पूर्वं तु बादरायणो हेतुव्यपदेशात् । | | | |

10

| I | II | III | IV | V | VI | VII | VIII | IX | X | XI | XII | XIII | XIV |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| 3 | उपासना | ॥ | 3 | गुणोपसंहारः | 83 | 1 (15) | सर्ववेदान्तप्रत्ययाधिकरणं | 355 | 1 | 1 | सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात् । | सि | चोदनाया अविशिष्टत्वात्, |
| | | | | | | | | 356 | 2 | 2 | भेदान्नेति चेदेकस्यामपि । | पू/सि | ध्येयैक्यात् अविशेष पुनः |
| | | | | | | | | 357 | 3 | 3 | स्वाध्यायस्य तथात्वे हि समाचारेऽधिकाराच्च सववच्च तन्नियमः । | सि | श्रवणादेः प्रतिपत्तृ भेद |
| | | | | | | | | 358 | 4 | 4 | दर्शयति च । | | निबन्धनत्वाच्च न विद्या भेदः। |
| | | | | | | | | 359 | 5 | 5 | उपसंहारोऽर्थाभेदाद्विधिशेषवत्समाने च । | | (वैश्वानर विद्या) |
| | | | | | 84 | 2 (16) | अन्यथात्वाधिकरणं | 360 | 6 | 1 | अन्यथात्वं शब्दादिति चेन्नाविशेषात् । (बृ 3.3.1 | पू* | ← |
| | | | | | | | | 361 | 7 | 2 | न वा प्रकरणभेदात्परोवरीयस्त्वादिवत् । छा 1.2.1) | सि | (उद्गीथ विद्या) |
| | | | | | | | | 362 | 8 | 3 | संज्ञातश्चेत्तदुक्तमस्ति तु तदपि । | पू/सि | रूपभेदाद्विद्या भेदः। |
| | | | | | | | | 363 | 9 | 4 | व्याप्तेश्च समञ्जसं । | सि | |
| | | | | | 85 | 3 (17) | सर्वाभेदाधिकरणं | 364 | 10 | 1 | सर्वाभेदादन्यत्रेमे । (छा 5.1.1 कौ.) | | प्राण विद्याऽभेदः। |
| | | | | | 86 | 4 (18) | आनन्दाद्यधिकरणं | 365 | 11 | 1 | आनन्दादयः प्रधानस्य । (तै. आन) | | |
| | | | | | | | | 366 | 12 | 2 | प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे । | | |
| | | | | | | | | 367 | 13 | 3 | इतरे त्वर्थसामान्यात् । | | आनन्दादयः पञ्च स्वरूप |
| | | | | | | | | 368 | 14 | 4 | आध्यानाय प्रयोजनाभावात् । | | निरूपक धर्माः सर्वास्वपि |
| | | | | | | | | 369 | 15 | 5 | आत्मशब्दाच्च । | | ब्रह्म विद्यासु अनुसन्धेयाः। |
| | | | | | | | | 370 | 16 | 6 | आत्मगृहीतिरितरवदुत्तरात् । | | |
| | | | | | | | | 371 | 17 | 7 | अन्वयादिति चेत् स्यादवधारणात् । | पू/सि | |
| | | | | | 87 | 5 (19) | कार्याख्यानाधिकरणं | 372 | 18 | 1 | कार्याख्यानादपूर्वम् । (बृ 5.1.14) | | प्राण विद्या - अपां वासस्त्वानुसन्धानं |
| | | | | | 88 | 6 (20) | समानाधिकरणं | 373 | 19 | 1 | समान एवं चाभेदात् । बृ 6.1, अग्निर. | | शाण्डिल्य विद्यैक्यं । |
| | | | | | 89 | 7 (21) | सम्बन्धाधिकरणं | 374 | 20 | 1 | सम्बन्धादेवमन्यत्रापि । (बृ 7.5.1, 7.4.2) | पू | व्याहृति विद्या,- विद्या (रूप) भेदः |
| | | | | | | | | 375 | 21 | 2 | न वा विशेषात् । | सि | (आदित्ये अक्षिणि च अहः |
| | | | | | | | | 376 | 22 | 3 | दर्शयति च । | " | अहं इति व्याहृति शरीरकं ब्रह्म) |
| | | | | | 90 | 8 (22) | सम्भृत्यधिकरणं | 377 | 23 | 1 | संभृतिद्युव्याप्त्यपि चातः । (राणायनीय कठ 1.2.25) | | स्थान भेदाद्व्यवस्था । |
| | | | | | 91 | 9 (23) | पुरुषविद्याधिकरणं | 378 | 24 | 1 | पुरुषविद्यायामपि चेतरेषामनाम्नानात् । (छा. 3.16.7 तै. नारा. 64) | | फल भेदाद्विद्या भेदः । |
| | | | | | 92 | 10 (24) | वेधाद्यधिकरणं | 379 | 25 | 1 | वेधाद्यर्थभेदात् । | | शान्तिपाठस्याध्ययनाङ्गत्वं । |
| | | | | | 93 | 11 (25) | हान्यधिकरणं | 380 | 26 | 1 | हानौ तूपायनशब्दशेषत्वात्कुशाच्छन्दस्स्तुत्युपगानवत्तदुक्तं । (कौषी 1.4 शाट्या छा. 8.13.1) | | पुण्यपापयोः हानिसंक्रमणं चिन्तनं । |
| | | | | | 94 | 12 (26) | साम्परायाधिकरणं | 381 | 27 | 1 | साम्पराये तर्तव्याभावात्तथा ह्यन्ये । (छा 8.13.1) | | |
| | | | | | | | | 382 | 28 | 2 | छन्दत उभयाविरोधात् । | | |
| | | | | | | | | 383 | 29 | 3 | गतेरर्थवत्त्वमुभयथाऽन्यथा हि विरोधः । | | कृत्स्नकर्मणां देहवियोग |
| | | | | | | | | 384 | 30 | 4 | उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत् । | | -काल एव नाशः। |
| | | | | | | | | 385 | 31 | 5 | यावदधिकारमवस्थितिराधिकारिकाणां । | | |
| | | | | | 95 | 13 (27) | अनियमाधिकरणं | 386 | 32 | 1 | अनियमस्सर्वेषामविरोधश्शब्दानुमानाभ्यां । (बृ 8.2.15 छा 5.10.1) | | अर्चिरादिगतिः सर्वविद्यासमा। |
| | | | | | 96 | 14 (28) | अक्षरध्यधिकरणं | 387 | 33 | 1 | अक्षरधियां त्ववरोधस्सामान्यतद्भावाभ्यामौपसदवत्तदुक्तं । (बृ 5.8.8 मु 1.1.5) | | हेयप्रत्यनीकत्वस्य सर्व- |
| | | | | | | | | 388 | 34 | 2 | इयदामननात् । | | ब्रह्मविद्यानुयायित्वं । |
| | | | | | 97 | 15 (29) | अन्तरत्वाधिकरणं | 389 | 35 | 1 | अन्तरा भूतग्रामवत्स्वात्मनोऽन्यथा भेदानुपपत्तिरिति चेन्नोपदेशवत् । (बृ 5.4 5.5) | पू/सि | उषस्ति कहोल विद्या - |
| | | | | | | | | 390 | 36 | 2 | व्यतिहारो विशिंषन्ति हीतरवत् । | सि | (विद्यैक्यं) |

॥

| I | II | III | IV | V | VI | VII | VIII | IX | X | XI | XII | | XIII | XIV |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| 3 | उपासना | 11 | 3 | गुणोपसंहारः | | | | 391 | 37 | 3 | सैव हि सत्यादयः। | | सि | |
| | | | | | 98 | 16 (30) | कामाद्यधिकरणं | 392 | 38 | 1 | कामादीतरत्र तत्र चाऽऽयतनादिभ्यः। | (छा 8.1 बृ 6.4.21) | | दहरविद्यैक्यं - |
| | | | | | | | | 393 | 39 | 2 | आदरादलोपः। | | | |
| | | | | | | | | 394 | 40 | 3 | उपस्थितेऽतस्तद्वचनात्। | | | |
| | | | | | 99 | 17 (31) | तन्निर्धारणानियमाधि | 395 | 41 | 1 | तन्निर्धारणानियमस्तद्दृष्टेः पृथग्घ्यप्रतिबन्धः फलं। | (छा 1.1) | | उद्गीथाद्युपासनस्य नोपा |
| | | | | | 100 | 18 (32) | प्रदानाधिकरणं | 396 | 42 | 1 | प्रदानवदेव तदुक्तं। | (छा 8.1.6) | | चिन्तनरूपभेदः दान नियम प्रतिगुणं गुणोपसंहारः (दहरः) |
| | | | | | 101 | 19 (33) | लिङ्गभूयस्त्वाधिकर | 397 | 43 | 1 | लिङ्गभूयस्त्वात्तद्धि बलीयस्तदपि। | (तै नारा 11,12) | | नारायणानुवाक विचारः। |
| | | | | | 102 | 20 (34) | पूर्वविकल्पाधिकरणं | 398 | 44 | 1 | पूर्वविकल्पः प्रकरणात्स्यात् क्रियामानसवत्। | | पू | |
| | | | | | | | | 399 | 45 | 2 | अतिदेशाच्च। | | ″ | |
| | | | | | | | | 400 | 46 | 3 | विद्यैव तु निर्धारणाद्दर्शनाच्च। | | सि | |
| | | | | | | | | 401 | 47 | 4 | श्रुत्यादिबलीयस्त्वाच्च न बाधः। | | | मनश्चिदादयो विद्या- |
| | | | | | | | | 402 | 48 | 5 | अनुबन्धादिभ्यः प्रज्ञान्तरपृथक्त्ववद्दृष्टश्च तदुक्तं। | | | -मयक्रत्वङ्गभूताः। |
| | | | | | | | | 403 | 49 | 6 | न सामान्यादप्युपलब्धेर्मृत्युवन्न हि लोकापत्तिः। | | | |
| | | | | | | | | 404 | 50 | 7 | परेण च शब्दस्य ताद्विध्यं भूयस्त्वात्त्वनुबन्धः। | | | |
| | | | | | 103 | 21 (35) | शरीरे भावाधिकरणं | 405 | 51 | 1 | एक आत्मनः शरीरे भावात्। | | पू | सर्वासु परविद्यासु |
| | | | | | | | | 406 | 52 | 2 | व्यतिरेकस्तद्भावभावित्वान्न तूपलब्धिवत्। | | सि | प्रत्यगात्मा शुद्धावस्थ उपास्यः |
| | | | | | 104 | 22 (36) | अङ्गावबद्धाधिकरणं | 407 | 53 | 1 | अङ्गावबद्धास्तु न शाखासु हि प्रतिवेदं। | (छा 1.1) | | सर्वासु शाखासु उद्गीथो |
| | | | | | | | | 408 | 54 | 2 | मन्त्रादिवद्वाऽविरोधः। | | | पासनानि भवन्त्येव। |
| | | | | | 105 | 23 (37) | भूम्नःज्यायस्त्वाधिकर | 409 | 55 | 1 | भूम्नः क्रतुवज्ज्यायस्त्वं तथा हि दर्शयति। | (छा 5.12.2) | | सामस्त्येनैव वैश्वानर भजनं |
| | | | | | 106 | 24 (38) | शब्दादिभेदाधिकरणं | 410 | 56 | 1 | नाना शब्दादिभेदात्। | | | सद्विद्यादहरविद्यादयो भिन्नाः |
| | | | | | 107 | 25 (39) | विकल्पाधिकरणं | 411 | 57 | 1 | विकल्पोऽविशिष्टफलत्वात्। | | | मोक्षार्थानां ब्रह्मविद्यानां |
| | | | | | | | | 412 | 58 | 2 | काम्यास्तु यथाकामं समुच्चीयेरन्न वा पूर्वहेत्वभावात्। | | | विकल्प एव। |
| | | | | | 108 | 26 (40) | यथाश्रयभावाधिकरणं | 413 | 59 | 1 | अङ्गेषु यथाश्रयभावः। | (छा 1.1 4.12.10) | पू | |
| | | | | | | | | 414 | 60 | 2 | शिष्टेश्च। | | ″ | |
| | | | | | | | | 415 | 61 | 3 | समाहारात्। | | ″ | उद्गीथोपासनस्य |
| | | | | | | | | 416 | 62 | 4 | गुणसाधारण्यश्रुतेश्च। | | ″ | क्रतुष्वनियमः। |
| | | | | | | | | 417 | 63 | 5 | न वा तत्सहभावाश्रुतेः। | | सि | |
| | | | | | | | | 418 | 64 | 6 | दर्शनाच्च। | | | |
| | | 12 | 4 | अङ्गपादः | 109 | 1 (41) | पुरुषार्थाधिकरणं | 419 | 1 | 1 | पुरुषार्थोऽतश्शब्दादिति बादरायणः। | (छा 2.13.1) | | |
| | | | | | | | | 420 | 2 | 2 | शेषत्वात्पुरुषार्थवादो यथाऽन्येष्विति जैमिनिः। | | पू | |
| | | | | | | | | 421 | 3 | 3 | आचारदर्शनात्। | | ″ | |
| | | | | | | | | 422 | 4 | 4 | तच्छ्रुतेः। | | ″ | |
| | | | | | | | | 423 | 5 | 5 | समन्वारम्भणात्। | | ″ | कर्माङ्गकाले उपासनात् |
| | | | | | | | | 424 | 6 | 6 | तद्वतो विधानात्। | | ″ | पुरुषार्थावाप्तिः। |
| | | | | | | | | 425 | 7 | 7 | नियमात्। | | ″ | |
| | | | | | | | | 426 | 8 | 8 | अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात्। | | सि | |

12

| I | II | III | IV | V | VI | VII | VIII | IX | X | XI | XII | | XIII | XIV |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| 3 | उपासना | 12 | 4 | अङ्ग.पादः | | | | 427 | 9 | 9 | तुल्यं तु दर्शनं। | | सि | |
| | | | | | | | | 428 | 10 | 10 | असार्वत्रिकी। | | | |
| | | | | | | | | 429 | 11 | 11 | विभागः शतवत्। | | | |
| | | | | | | | | 430 | 12 | 12 | अध्ययनमात्रवतः। | | | |
| | | | | | | | | 431 | 13 | 13 | नाविशेषात्। | | | |
| | | | | | | | | 432 | 14 | 14 | स्तुतयेऽनुमतिर्वा। | | | |
| | | | | | | | | 433 | 15 | 15 | कामकारेण चैके। | | | |
| | | | | | | | | 434 | 16 | 16 | उपमर्दं च। | | | |
| | | | | | | | | 435 | 17 | 17 | ऊर्ध्वरेतस्सु च शब्दे हि। | | | |
| | | | | | | | | 436 | 18 | 18 | परामर्शं जैमिनिरचोदनाच्चापवदति हि। | | | |
| | | | | | | | | 437 | 19 | 19 | अनुष्ठेयं बादरायणस्साम्यश्रुतेः। | | | |
| | | | | | | | | 438 | 20 | 20 | विधिर्वा धारणवत्। | | | |
| | | | | | 110 | 2 (42) | स्तुतिमात्राधिकरणं | 439 | 21 | 1 | स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात्। | (छा 1.1.3) | पू/सि | उद्गीथे रसतमत्वदृष्टिविधिः |
| | | | | | | | | 440 | 22 | 2 | भावशब्दाच्च। | | सि | |
| | | | | | 111 | 3 (43) | पारिप्लवाधिकरणं | 441 | 23 | 1 | पारिप्लवार्था इति चेन्न विशेषितत्वात्। | (छा 6.1.1) | पू/सि | उपाख्यानानि विद्याशेषभूतानि। |
| | | | | | | | | 442 | 24 | 2 | तथा चैकवाक्योपबन्धात्। | | सि | |
| | | | | | 112 | 4 (44) | अग्नीन्धनाद्यधिकरणं | 443 | 25 | 1 | अत एव चाग्नीन्धनाद्यनपेक्षा। | (छा 2.23, 5.10, बृ 6.4.22, कठ 1.2.15) | | यत्यादीनो ब्रह्मविद्याग्निनिरपेक्षा |
| | | | | | 113 | 5 (45) | सर्वापेक्षाधिकरणं | 444 | 26 | 1 | सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्। | (बृ 6.4.22) | | विद्या यज्ञाद्याश्रमविहितापेक्षा |
| | | | | | 114 | 6 (46) | शमदमाद्यधिकरणं | 445 | 27 | 1 | शमदमाद्युपेतस्स्यात् तथाऽपि तु तद्विधेस्तदङ्गतया तेषामप्यवश्यानुष्ठेयत्वात्। | (बृ 6.4.23) | | गृहस्थैः शमदमाद्यनुष्ठेयानि |
| | | | | | ✓ 115 | 7 (47) | सर्वान्नानुमत्यधिकरणं | 446 | 28 | 1 | सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात्। | (छा 5.2.1, 7.26.2) | | विदुषामपि सर्वान्नानुमतिः प्राणात्यय एव। |
| | | | | | | | | 447 | 29 | 2 | अबाधाच्च। | | | |
| | | | | | | | | 448 | 30 | 3 | अपि स्मर्यते। | | | |
| | | | | | | | | 449 | 31 | 4 | शब्दश्चातोऽकामकारे। | | | |
| | | | | | 116 | 8 (48) | विहितत्वाधिकरणं | 450 | 32 | 1 | विहितत्वाच्चाऽऽश्रमकर्मापि। | (बृ 6.4.22, तै नारा. 62) | | केवलाश्रमिणां मुमुक्षूणां च अनुष्ठेया यज्ञादयः। |
| | | | | | | | | 451 | 33 | 2 | सहकारित्वेन च। | | | |
| | | | | | | | | 452 | 34 | 3 | सर्वथाऽपि तत्रोभयलिङ्गात्। | | | |
| | | | | | | | | 453 | 35 | 4 | अनभिभवं च दर्शयति। | | | |
| | | | | | 117 | 9 (49) | विधुराधिकरणं | 454 | 36 | 1 | अन्तरा चापि तु तद्दृष्टेः। | (बृ 6.4.22, प्रश्न 1.10) | | विधुराद्यनाश्रमिणां ब्रह्मविद्याऽधिकारोऽस्ति। |
| | | | | | | | | 455 | 37 | 2 | अपि स्मर्यते। | | | |
| | | | | | | | | 456 | 38 | 3 | विशेषानुग्रहश्च। | | | |
| | | | | | | | | 457 | 39 | 4 | अतस्त्वितरज्ज्यायो लिङ्गाच्च। | | | |
| | | | | | 118 | 10 (50) | तद्भूताधिकरणं | 458 | 40 | 1 | तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमात्तद्रूपाभावेभ्यः। | (छा 2.23.1) | | नैष्ठिकाद्याश्रमभ्रष्टानां तु नाधिकारः। |
| | | | | | | | | 459 | 41 | 2 | न चाधिकारिकमपि पतनानुमानात्तदयोगात्। | | | |
| | | | | | | | | 460 | 42 | 3 | उपपूर्वमपीत्येके भावमशनवत्तदुक्तं। | | | |
| | | | | | | | | 461 | 43 | 4 | बहिस्तूभयथाऽपि स्मृतेराचाराच्च। | | | |
| | | | | | ✓ 119 | 11 (51) | स्वाम्यधिकरणं | 462 | 44 | 1 | स्वामिनः फलश्रुतेरित्यात्रेयः। | | पू | उद्गीथोपासनं -(070) |

13

| I | II | III | IV | V | VI | VII | VIII | IX | X | XI | XII | | XIII | XIV |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| 3 | उपासना | 12 | 4 | | | | | 463 | 45 | 2 | आर्त्विज्यमित्यौडुलोमिः तस्मै हि परिक्रीयते । | | सि | ऋत्विजैव कर्तव्यं । |
| | | | | | 120 | 12 (52) | सहकार्यधिकरणं | 464 | 46 | 1 | सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत् । | (बृ 5.5.1) | | बाल्य पाण्डित्य मौनत्रयं ब्रह्मकारि । |
| | | | | | | | | 465 | 47 | 2 | कृत्स्नभावात्तु गृहिणोपसंहारः । | | | |
| | | | | | | | | 466 | 48 | 3 | मौनवदितरेषामप्युपदेशात् । | | | |
| | | | | | 121 | 13 (53) | अनाविष्काराधिकरणं | 467 | 49 | 1 | अनाविष्कुर्वन्नन्वयात् । | (बृ 5.5.1) | | बाल्यं स्वमहिमानाविष्करणेन |
| | | | | | 122 | 14 (54) | ऐहिकाधिकरणं | 468 | 50 | 1 | ऐहिकमप्रस्तुतप्रतिबन्धे तद्दर्शनात् । | (छा 1.1.10) | | ऐहिकफलविद्यासु फलानियमः । |
| | | | | | 123 | 15 (55) | मुक्तिफलाधिकरणं | 469 | 51 | 1 | एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः ॥ | – | | मुक्तेरप्येवं । |
| 4 | फलाध्यायः<br>".. अश्रैरङ्गैः प्रयाजैरिह भवति रसैः पाद्गीति प्रबन्धः" (11,11,5,6)<br>".. उपासाऽऽरोहप्रभावोत्क्रमसरणि फलान्यत्निमे चिन्तितानि"<br>".. पापाच्छेद्, ब्रह्मनाडीगतिकृद् अतिवहन् साम्यदश्चात्र वेद्यः" | 13 | 1 | आवृत्तिपादः | 124 | 1 | आवृत्त्यधिकरणं | 470 | 1 | 1 | आवृत्तिरसकृदुपदेशात् । | (तै. भान, कठ 3.15) | | उपासनमसकृदावृत्तौ |
| | | | | | | | | 471 | 2 | 2 | लिङ्गाच्च । | | | |
| | | | | | 125 | 2 | आत्मोपासनाधिकरणं | 472 | 3 | 1 | आत्मेति तूपगच्छन्ति ग्राहयन्ति च । | (बृ 3.4.10) | | उपासित्रा स्वात्मत्वेन ब्रह्मोपास्यम् |
| | | | | | 126 | 3 | प्रतीकाधिकरणं | 473 | 4 | 1 | न प्रतीके न हि सः । | (छा 3.18.1, 7.1.5) | | निकृष्टेषूत्कृष्ट बुद्धिः कार्या ।(मनः देवता) |
| | | | | | | | | 474 | 5 | 2 | ब्रह्मदृष्टिरुत्कर्षात् । | | | |
| | | | | | 127 | 4 | आदित्यादिमत्यधिकर | 475 | 6 | 1 | आदित्यादिमतयश्चाङ्ग उपपत्तेः । | (छा 1.3.1) | | उद्गीथादौ आदित्यादिदृष्टिः |
| | | | | | 128 | 5 | आसीनाधिकरणं | 476 | 7 | 1 | आसीनस्सम्भवात् । | | | |
| | | | | | | | | 477 | 8 | 2 | ध्यानाच्च । | | | |
| | | | | | | | | 478 | 9 | 3 | अचलत्वं चापेक्ष्य । | | | आसीनेनैवोपासनमनुष्ठेयं । |
| | | | | | | | | 479 | 10 | 4 | स्मरन्ति च । | | | |
| | | | | | | | | 480 | 11 | 5 | यत्रैकाग्रता तत्राविशेषात् । | | | |
| | | | | | 129 | 6 | आप्रयाणाधिकरणं | 481 | 12 | 1 | आप्रयाणात्तत्रापि हि दृष्टं । | (छा 8.15.1) | | आमरणादनुवर्तनीयं । |
| | | | | | 130 | 7 | तदधिगमाधिकरणं | 482 | 13 | 1 | तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् । | (छा 4.14, 5.24) | | पूर्वोत्तरयोः पापयोर्विनाशाश्लेषौ । |
| | | | | | 131 | 8 | इतराधिकरणं | 483 | 14 | 1 | इतरस्याप्येवमसंश्लेषः पाते तु । | (छा 8.14, मौ 1.4) | | " सुकृतयोरपि । |
| | | | | | 132 | 9 | अनारब्धकार्याधिक. | 484 | 15 | 1 | अनारब्धकार्ये एव तु पूर्वे तदवधेः । | (छा 5.24.3) | | फलदानाप्रवृत्ते पुण्यपापे नश्यतः |
| | | | | | 133 | 10 | अग्निहोत्राद्यधिकरणं | 485 | 16 | 1 | अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात् । | (बृ 6.4.22) | | अग्निहोत्रादिके नित्यनैमित्तिके कर्म तत्फलमनिच्छतापि |
| | | | | | | | | 486 | 17 | 2 | अतोऽन्यापि ह्येकेषामुभयोः । | | | अनुष्ठेयमेव । |
| | | | | | | | | 487 | 18 | 3 | यदेव विद्ययेति हि । | | | |
| | | | | | 134 | 11 | इतरक्षपणाधिकरणं | 488 | 19 | 1 | भोगेन त्वितरे क्षपयित्वाऽथ सम्पद्यते । | | | प्रारब्धकर्मणः एकशरीरावसान नियमो न । |
| | | 14 | 2 | उत्क्रान्तिपादः | 135 | 1 (12) | वागधिकरणं | 489 | 1 | 1 | वाङ्मनसि दर्शनाच्छब्दाच्च । | (छा 8.6.3) | | वागिन्द्रियं मनसा संयुज्यते । |
| | | | | | | | | 490 | 2 | 2 | अत एव सर्वाण्यनु । | | | |
| | | | | | 136 | 2 (13) | मनोऽधिकरणं | 491 | 3 | 1 | तन्मनः प्राण उत्तरात् । | (छा 6.8.6, 6.6.5) | | मनसः प्राणेन संयोगमात्रं । |
| | | | | | 137 | 3 (14) | अध्यक्षाधिकरणं | 492 | 4 | 1 | सोऽध्यक्षे तदुपगमादिभ्यः । | (बृ 6.3.38, 6.4.2) | | प्राणः जीवेन सम्पद्यते । |
| | | | | | 138 | 4 (15) | भूताधिकरणं | 493 | 5 | 1 | भूतेषु तच्छ्रुतेः । | (छा 6.8.6) | | सजीवः प्राणः भूतान्तर |
| | | | | | | | | 494 | 6 | 2 | नैकस्मिन् दर्शयतो हि । | | | संसृष्टतेजसा संपद्यते । |
| | | | | | 139 | 5 (16) | आसृत्युपक्रमाधिकरणं | 495 | 7 | 1 | समाना चासृत्युपक्रमादमृतत्वं चानुपोष्य । | (कठ 2.6.14,16) | | |
| | | | | | | | | 496 | 8 | 2 | तदापीतेः संसारव्यपदेशात् । | | | इयमुत्क्रान्तिः विद्वदविदुषोः |
| | | | | | | | | 497 | 9 | 3 | सूक्ष्मं प्रमाणतश्च तथोपलब्धेः । | | | नाडीप्रवेशात् प्राक् समाना । |
| | | | | | | | | 498 | 10 | 4 | नोपमर्देनातः । | | | |

14

| I | II | III | IV | V | VI | VII | VIII | IX | X | XI | XII | XIII | XIV |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| 4 | फलं | 14 | 2 | | | | | 499 | 11 | 5 | अस्त्यैव चोपपत्तेरूष्मा । | सि | |
| | | | | | | | | 500 | 12 | 6 | प्रतिषेधादिति चेन्न शारीरात्स्पष्टो ह्येकेषां । | पू / सि | |
| | | | | | | | | 501 | 13 | 7 | स्मर्यते च । | सि | |
| | | | | | 140 | 6 (17) | परसम्पत्त्यधिकरणं | 502 | 14 | 1 | तानि परे तथा ह्याह । (छा 6.8.6) | | जीवसंयुक्तानि तेजःप्रभृति भूतानि परमात्मनि संपद्यन्ते। परे संयोगमात्रं ; न लयः। |
| | | | | | 141 | 7 (18) | अविभागाधिकरणं | 503 | 15 | 1 | अविभागो वचनात् । | | |
| | | | | | 142 | 8 (19) | तदोकोऽधिकरणं | 504 | 16 | 1 | तदोकोग्रज्वलनं तत्प्रकाशितद्वारः विद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्च- -हार्दानुगृहीतश्शताधिकया । (कठ 2.6.16, बृ 6.4) | | प्रकाशितद्वारया मूर्धन्य- नाड्यैव निष्क्रामति । |
| | | | | | 143 | 9 (20) | रश्म्यधिकरणं | 505 | 17 | 1 | रश्म्यनुसारी । (छा 8.6.5) | | |
| | | | | | 144 | 10 (21) | निशाधिकरणं | 506 | 18 | 1 | निशि नेति चेन्न सम्बन्धस्य यावद्देहभावित्वाद्दर्शयति च । | पू / सि | निशि मृतस्यापि ब्रह्मप्राप्तिः |
| | | | | | ✓ 145 | 11 (22) | दक्षिणायनाधिकरणं | 507 | 19 | 1 | अतश्चायनेऽपि दक्षिणे । (तै.नारा.64, छा 5.10.5) | सि | दक्षिणायनमृतस्यापि ब्रह्मप्राप्तिरस्ति । |
| | | | | | | | | 508 | 20 | 2 | योगिनः प्रति स्मर्यते स्मार्ते चैते । | | |
| | | 15 | 3 | गतिपादः | 146 | 1 (23) | अर्चिराद्यधिकरणं | 509 | 1 | 1 | अर्चिरादिना तत्प्रथितेः । | | अर्चिरादिनैकेनैव सर्वे गच्छन्ति |
| | | | | | 147 | 2 (24) | वाय्वधिकरणं | 510 | 2 | 1 | वायुमब्दादविशेषविशेषाभ्यां । (बृ 8.1.15, कौषी 1.3) | | संवत्सरादित्यमध्ये वायुः। |
| | | | | | 148 | 3 (25) | वरुणाधिकरणं | 511 | 3 | 1 | तटितोऽधि वरुणस्सम्बन्धात् । (कौषी 1.3, बृ 8.2.15) | | तटितोऽनन्तरं वरुणादीनां स्थितिः। |
| | | | | | 149 | 4 (26) | आतिवाहिकाधिकरणं | 512 | 4 | 1 | आतिवाहिकास्तल्लिङ्गात् । (छा 4.15.5, कौषी 1.3) | | अर्चिरादिकाः आतिवाहिकाः |
| | | | | | | | | 513 | 5 | 2 | वैद्युतेनैव ततस्तच्छ्रुतेः । | | |
| | | | | | 150 | 5 (27) | कार्याधिकरणं | 514 | 6 | 1 | कार्यं बादरिरस्य गत्युपपत्तेः । (छा 4.15.5) | पू | |
| | | | | | | | | 515 | 7 | 2 | विशेषितत्वाच्च । | " | |
| | | | | | | | | 516 | 8 | 3 | सामीप्यात्तु तद्व्यपदेशः । | " | |
| | | | | | | | | 517 | 9 | 4 | कार्यात्यये तदध्यक्षेण सहातः परमभिधानात् । | " | प्रतीकोपासकव्यतिरिक्ता- -नेव आतिवाहिकगणो नयति । |
| | | | | | | | | 518 | 10 | 5 | स्मृतेश्च । | " | |
| | | | | | | | | 519 | 11 | 6 | परं जैमिनिर्मुख्यत्वात् । | | |
| | | | | | | | | 520 | 12 | 7 | दर्शनाच्च । | | |
| | | | | | | | | 521 | 13 | 8 | न च कार्ये प्रत्यभिसन्धिः । | | |
| | | | | | | | | 522 | 14 | 9 | अप्रतीकालम्बनान्नयतीति बादरायण उभयथा च दोषात्तत्क्रतुश्च । | सि | |
| | | | | | | | | 523 | 15 | 10 | विशेषञ्च दर्शयति । | • | |
| | | 16 | 4 | मुक्तिपादः | 151 | 1 (28) | संपद्याविर्भावाधिकरणं | 524 | 1 | 1 | सम्पद्याविर्भावः स्वेन शब्दात् । (छा 8.15.2) | | |
| | | | | | | | | 525 | 2 | 2 | मुक्तः प्रतिज्ञानात् । | | मुक्तः स्वाभाविकरूपेण आविर्भवति । |
| | | | | | | | | 526 | 3 | 3 | आत्मा प्रकरणात् । | | |
| | | | | | 152 | 2 (29) | अविभागेन दृष्टत्वाधि॰ | 527 | 4 | 1 | अविभागेन दृष्टत्वात् । (तै.आन.1, छा 8.12.2) | | मुक्तः स्वात्मानं परमात्माऽपृथक्सिद्धत्वेनानुभवति। |
| | | | | | ✓ 153 | 3 (30) | ब्राह्माधिकरणं | 528 | 5 | 1 | ब्राह्मेण जैमिनिरुपन्यासादिभ्यः । (बृ 6.5.13, छा 8.1.5) | • | ज्ञानस्वरूपेण अपहतपाप्मत्वादिधर्मवत्त्वेन चाविर्भवति। |
| | | | | | | | | 529 | 6 | 2 | चिति तन्मात्रेण तदात्मकत्वादित्यौडुलोमिः । | " | |
| | | | | | | | | 530 | 7 | 3 | एवमप्युपन्यासात् पूर्वभावादविरोधं बादरायणः । | सि | |
| | | | | | 154 | 4 (31) | सङ्कल्पाधिकरणं | 531 | 8 | 1 | सङ्कल्पादेव तच्छ्रुतेः । (छा 8.12.2, 8.2.1) | | प्रयत्नान्तरानपेक्षं संकल्पादेव मुक्तस्येष्टार्थप्राप्तिः। |
| | | | | | | | | 532 | 9 | 2 | अत एव चानन्याधिपतिः । | | |
| | | | | | 155 | 5 (32) | अभावाधिकरणं | 533 | 10 | 1 | अभावं बादरिराह ह्येवं । (छा 8.12.2, 7.26.2) | • | |

15

| I | II | III | IV | V | VI | VII | VIII | IX | X | XI | XII | XIII | XIV |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| 4 | फलं | 16 | 4 | मुक्तिपादः | | | | 534 | 11 | 2 | भावं जैमिनिर्विकल्पामननात् । | • | |
| | | | | | | | | 535 | 12 | 3 | द्वादशाहवदुभयविधं बादरायणोऽतः । | सि | |
| | | | | | | | | 536 | 13 | 4 | तन्वभावे सन्ध्यवदुपपत्तेः । | | मुक्तः कदाचित्सतनुः |
| | | | | | | | | 537 | 14 | 5 | भावे जाग्रद्वत् । | | कदाचिदतनुश्च भवति । |
| | | | | | | | | 538 | 15 | 6 | प्रदीपवदावेशस्तथा हि दर्शयति । | | |
| | | | | | | | | 539 | 16 | 7 | स्वाप्ययसम्पत्त्योरन्यतरापेक्षमाविष्कृतं हि । | | |
| | | | | | 156 | 6 (33) | जगद्व्यापारवर्जाधिकरण | 540 | 17 | 1 | जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च । | | |
| | | | | | | | | 541 | 18 | 2 | प्रत्यक्षोपदेशादिति चेन्नाधिकारिकमण्डलस्थोक्तेः । | पू/छि | |
| | | | | | | | | 542 | 19 | 3 | विकारावर्ति च तथा हि स्थितिमाह । | सि | मुक्तस्य जगत्स्रष्टृत्वं |
| | | | | | | | | 543 | 20 | 4 | दर्शयतश्चैवं प्रत्यक्षानुमाने । | | नास्ति, ब्रह्मणा समं |
| | | | | | | | | 544 | 21 | 5 | भोगमात्रसाम्यलिङ्गाच्च । | | भोगमात्रे साम्यमस्ति । |
| | | | | | | | | 545 | 22 | 6 | अनावृत्तिश्शब्दादनावृत्तिश्शब्दात् ॥ | | |
| | अधिकृतिगणना चिन्मयी ब्रह्मकाण्डे ↑ | | | | | | | ↑ सौत्री संख्या शुभाशीः | | | | | |

16

श्रीरङ्गक्षेत्रे दशावतारसन्निधौ श्रीमदहोबिलमठे 44पट्टे मूर्धाभिषिक्तानां श्रीवण्शठकोप श्री वेदान्तदेशिक-यतीन्द्रमहादेशिकानां जयन्तीसन्दर्भे (1987) समायोजित-मालोलविद्वत्सभायां बहुभिः विद्वद्भिः प्रस्तुताः वेदान्त-विचाराः प्रस्तुतिसमकालं विषयप्रश्नोत्तररूपेण अन्येषां मार्गदर्शनाय स्युः इति दैनन्दिनक्रमेण सङ्गृहीताः -

26/8 ① ~~जिज्ञासाधिकरणं~~ जन्माद्यधिकरणं - प्राप्यत्वेन प्रापकत्वेन च निरूपितं ब्रह्म किं लक्षणं - जगज्जन्मादिकारणत्वं
लक्षणं - इतरव्यावृत्त्यर्थं - तत् ब्रह्मशब्देनैव कृतमिति - आक्षेपे किं लक्ष्यतावच्छेदकत्वमेव लक्ष्यत्वं ?
विशेष्यमात्रे ब्रह्माणि लक्षिते पर्याप्तं इति - स्वरूपमात्रं लक्ष्यमिति। न चाभिन्ननिमित्तोपादानत्वार्थं, नाप्युभयलिङ्गत्वार्थं, प्रकृत्यधिकरणे कथ्यमानत्वात् →
न च विशिष्ट, उपलक्षिते वा - इति स्वरूपनिरूपकमात्रं (सत्यं ज्ञानमनन्तं ब्रह्म) →
जिज्ञास्य ब्रह्मण एवात्र लक्षणमुच्यते → न तु ब्रह्मस्वरूपमात्रस्य | तापत्रयातुरैरमृतत्वाय स एव जिज्ञास्यः
अनिरूपितस्वरूपविशेषणं ब्रह्म स्वरूपनिरूपकधर्मैः उपास्यं ब्रह्मेति। कथं ध्येयः कारणन्तु ध्येयः →
सत्यत्वाद्युक्तौ - मुक्तज्ञानेऽतिव्याप्तिः - अतः कारणत्वं अपेक्षितं। स्वरूपमात्रस्य कर्तृत्वं नास्ति।

② लिङ्गभूयस्त्वाधिकरणं - अत्र नारायणानुवाकात् ~~किं~~ क-गुणः अत्र गुणोपसंहारात् तयोभावविद्ययाविषयः ? नारायणत्वमिति ?
अधिकरणमनुत्थाप्यं आक्षेपे - दहरस्य ध्येयत्वे दहरस्य नारायणत्वे च सिद्धे - एकत्रोक्तानां गुणानां अन्यत्रस्थत्वेऽप्युपसंहार-
नियमादिति। अत्र → नैवं। तर्हि - अपहतपाप्मत्वादीनां अपि एवमेव (यद् दहरे अष्टगुणोपेतं इतीयर्थं)।
अत्र नारायणत्वं किं रूपं - (प्रकरणात् पूर्वपक्षः, लिङ्गात् सिद्धान्तः) अत्र लिङ्गशब्दं किमर्थं ? वाक्य (लिङ्ग) परं -
न तु मीमांसा प्रकरण (लिङ्ग) मीमांसा। न्याय लिङ्गानि नात्र प्रसक्तानि। वाचकानि →
नार्थसामर्थ्यरूपं अत्र लिङ्गं → ज्ञापकमेव -

③ ईक्षतिकर्माधिकरणं - ईक्षतिकर्मव्यपदेशात् ध्यायति कर्मापि स एवेति। अत्र संशयः ध्यायति कर्मण्येव। तत
अन्तरिक्षलोके - पुरिशयं ब्रह्मलोकादधस्तात् स्थितं -
उपास्यं किं - शब्दमात्रं वा ? स्वर्थभूतं वा ? भाष्ये - त्रिमात्रप्रणवेनोपासीतस्य → उपनिषदि - अक्षरेण परमपुरुषमभिध्या-करणतृतीया
यीत - इति सहयोगे तृतीया - उच्चारणेन सह ध्यायीत →
कुतः लिङ्ग (करणकर्म) व्यत्यासः भाष्यकारेण कृतः ? एकद्वित्रिमात्रेणापि प्रणवेन ध्यायतिकर्म परमात्मैव।

④ ज्ञान्यधिकरणं - यथैव - जिज्ञासाधिकरणं
तिरोधानानुपपत्तिः अविद्यया ब्रह्म उत्पत्तिप्रतिबन्धो वा नाशो वा - नाद्यः - अनुत्पाद्यत्वात् - अतः स्वरूपनाश एव स्यात्।
पराभिध्यानात्तु तिरोहितं - जीवस्य सधर्मकत्वात् - धर्मतिरोधिः - गुणाष्टकं - नैसर्गिकं - अनुत्पाद्यत्वात् - तत्रापि
धर्मभूतज्ञानस्य व्यापकत्वात् - संकोचविकासौ कथं अङ्गीक्रियेते आश्रयादन्यतो वृत्तेः —

⑤ जिज्ञासाधिकरणं परमार्थः जगन्मिथ्यात्वानुमान निरासः (जिज्ञासाधिकरणं) अपरमार्थः व्या बाधात् जगत् - मिथ्या - विवर्तमानत्वात्
ब्रह्म सत्यं - अनुवर्तमानत्वात् → उपाधिः साध्यव्यापकसाधनाव्यापकत्वं - पक्षावृत्तित्वं
द्विविधः उपाध्युद्भावने विपर्ययस्य अस्मादिष्टे दोषः ; अन्यच्च - उक्तहेतौ दृष्टान्ते एव उपाध्युत्थितिः।
(अनुवर्तमानत्वाद्वा अबाधितत्वाद्वा हेतोः ब्रह्मपरमार्थसिद्धिः यदि तर्हि - उपाधिः अनुद्भाव्यः ।)
एकविशेष्यकत्वं -
(फलप्रकाशरायपाणेः)

⑥ अन्तर्याम्यधिकरणं → आत्मनि अन्तः प्रविश्य नियमनं कथं ? यं पृथिवी न वेद - पृथिवीं अन्तरो यमयति कथं -
अचेतनत्वात् इति - पूर्वपक्षे - आत्मनि तिष्ठन् इत्यत्र कथं जीवस्य तदुपपत्तिः ? उपास्यत्वं, यद्वा
आचार्योपासने सदात्मा स्वात्मनि तिष्ठति - न वेदेति कथमिति चेत् - यावद्गुणग्रामपूर्तिं न जानातीति न सर्वात्मना
ज्ञानमित्यौपचारिकं इति → पूर्वपक्षे - पृथिवी शरीरं इत्यादौ शरीरत्वं -

⑦ जगद्व्यापारवर्जाधिकरणं - यथा परमपुरुषस्य सङ्कल्पः क्षेत्रस्य वसुदेवादिकं सृजति एवमेव - मुक्तोऽपि (स यदि पितृलोककामो भवति) स्वसङ्कल्पात्सृजतीति उक्तत्वात् - कथं तस्यासन्निहितत्वं ?

2/8 अन्तराधिकरणं - अदिति नाम जीवे न संभवति -

ज्योतिराद्यधिष्ठानाधिकरणं - अत्र विशेषं किं? स्वायत्तत्व परायत्तत्वं अधिष्ठाने किमर्थं उच्यते?
सिंहावलोकनन्यायेन पूर्वोक्त न्यायदार्ढ्यार्थं -? आक्षेपसङ्गतिः किं? अग्निर्वाग्भूत्वा मुखं प्राविशत् इत्यत्र
प्रयत्नः अग्निं वागप्येति इत्यादि। देवतापक्रमणपरा इति भाष्यपंक्तिः हेतुः। [अन्यादिगतिश्रुतेरिति चेन्न
भाक्तत्वात्) पूर्वं न विलक्षणत्वाधिकरणे - अभिमानिव्यपदेशस्तु

इन्द्रियाधिकरणं - त इन्द्रियाणि - वायुमेव अप्युत्त्व, पञ्चवृत्तिवादिना

कर्मानुस्मृतिशब्दविध्यधिकरणं - एतदधिकरण विशेषप्रयोजनं किं? कर्मणां अकृताभ्यागमकृतविप्रणाशादि प्रसङ्गः?
कर्म - पूर्वजन्मार्जितकृत कर्म वा - सुकृतदुष्कृतरूप कर्म - मनुष्यो वा इत्यपि वक्तव्यं?
अत्र कर्मानुस्मृतिशब्दविधिभ्यः - अत्र

पञ्चलक्षणी - व्याप्तिलक्षणं - पूर्वपक्षव्याप्तिः - साध्यवद्भिन्न साध्याभाववदवृत्तित्वं
औष्ण्यं, - - कुतः साध्यवद्भिन्नावृत्तित्वं पर्याप्तं किं? प्रयोजनं? धूमालोकभस्मभिः वह्निमनुमिनुयां

न्यायसूत्र -
तदप्रामाण्यं अनृतव्याघातपुनरुक्तदोषेभ्यः।

3/8/1 तदभावाधिकरणं - सुषुप्तिर्नाम - सता सोम्य तदा सम्पन्नो भवति हि - प्रासादखट्वापर्यङ्क इत्यादीया के?
अतः प्रबोधः - सः बोधयति अयं उत्तिष्ठति वा? - स एव तु - कथं अत्र पूर्वपक्षोत्थितिः? - ब्रह्मप्राप्तस्य
अपुनरावृत्तिश्रवणात् - पूर्वपक्षे कथं अन्यः कश्चित् उत्तिष्ठति? तस्य का प्राप्तिः? अत्येन केनापि ब्रह्मापीतौ
सद्भावे हि एव (सुप्तः) ब्रह्मप्राप्तवान् - इतरः उत्तिष्ठति इति युज्यते तथाऽत्र न। स्वाप्नसृष्टिवत् जीवान्तरस्य
प्रवेशः भगवता सृज्यते इति किं? शरीरेऽपि जीवान्तरवद्भावो वा? (एककायप्रवेशवत्?)
- पुनरुत्थित एव - अन्याधिष्ठितात् जीवाद्वेव इत्युक्ते।? परमात्मा → अजहत्स्वभावः उपासकानुग्रहार्थं
अत्र पूर्वपक्षाशयः सुषुप्तिः कुत्र? कथं? सूक्ष्मचेतनाचेतनविशिष्टः सकलकल्याणगुणविशिष्टः
स्वशरीरस्थं जीवान्तरं उत्थापयति इति पूर्वपक्षे शङ्कितः - उपपत्तेर्विद्यादित्यत्र - स्वरूपोपासनमप्यस्ति →

(2) शरीरेभावाधिकरणं - आत्मयाथात्म्यज्ञानं कर्माङ्गं इति भाष्ये - वर्तते दीपे. न सर्वत्र - कर्तृत्व, नित्यत्वादि
कर्तृ?

सप्तगत्यधिकरणं - सप्तगतेः सप्तानां सप्तसु वा समयता: विग्रहे पृष्टे
इन्द्रियाणि - (आद्य) सप्तैव - तमुत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति - आसमाव प्रियमाण इत्यत्र: कुत्र श्रुतं
सप्तानां इन्द्रियाणां प्रतिः - श्रोत्रं सप्तगत्यधिकरणे - सप्तेन्द्रियाणां
हस्तादयस्तु स्थिते (जीवच्छरीरे) इन्द्रियाणि - आप्रलयस्थायीनि किम | व सन्न्यसनादेव सिद्धौ तु समुत्क्रान्ति?)

भगवद्गीता → दशमोऽध्यायः
(कथं तस्मै इति न प्रयोगः - एतद्वचनावसरे भट्टार्यणां आगमः
अष्टश्लोकी → अकारार्थायैव - यथाह - अस्मै काले सकलमपि परमात्मैवाविरभूत, तत्र तं पुरःस्थितं निर्दिश्य
प्रयुक्तेयं श्रीसूक्तिः इति।

23/8 (विधिनिषेधौ) आरावली

1) परायत्ताधिकरणं - [illegible] स्वतन्त्रः कर्ता - स एव नियोज्यो भवति - कर्ता ह्यत्यतन्त्रः - - नैवं कर्मस्वकालप्रकृति [illegible]
परात्तु तच्छ्रुतेः - अन्तः प्रविष्टः शास्ता - य आत्मनि तिष्ठन् - तर्हि अनिवीना, अधो निनीषादि - का गतिः?
Mp - परात् (पंचम्यन्तं); परात् उद्भवति वा? परस्य इति कुतः न? अपादानार्थं किं? हेतौ पञ्चमी (विभाषा गुणे स्त्रियां)
औत्पत्तिकस्य कर्तृत्वस्य कथं (अधीनं) हेत्वपेक्षा? (कर्तृत्वं ज्ञानप्रसरण विशेष एव हि) - अधिष्ठानं तथा कर्ता करणं च पृथक्
विधं । विविधा च पृथक्चेष्टा दैवं चैवात्र पञ्चमं इति दैवस्यापि साक्षात्कर्तृत्वात् - परस्य इत्युक्तेऽपि युक्तिः - पञ्चम्याः प्रयोज्य
- त्वमर्थः - जीवगतकर्तृत्वस्य कार्यकरत्वं परादेव भवति । कर्तृत्वस्वरूपं न परमात्माधीनं । कर्ता शास्त्रार्थवत्त्वात् इत्यादावुक्तं ।
कर्तृत्वं भगवधीनं वा न वा? [illegible]
सिद्धत्वं । कर्तृत्वं - कृत्याश्रयत्वं परमात्माधीनमेव - (प्रवृत्तौ अनुमन्ता, प्रथमप्रवृत्तिः - उदासीनः, फलस्य - प्रयोज्यत्वं)
अनुमन्तृत्वं किं रूपं? - अनुमन्तुरपि अपथ्यप्रवर्तने - दुष्टत्वं स्यादेव हि । करण कले वरैः शास्त्रादिभिः अपथप्रवृत्तिं वारयति ।
हिताहितोपदेशः सामान्यतः कृतं । [illegible] - शास्त्रे शत्रुजयाय नैजगुरुणा - तत्रापराधी गुरुः? [illegible]
[illegible] प्रवृत्तस्य प्रवर्तनं अनुमन्तृत्वं - शास्त्रप्रतिषिद्धे प्रवर्तयितृत्वं अनुमन्तृत्वं
वा? (न परदारान् गच्छेत् (विधिनिषेधोक्ता) अत्र - निषिद्धेऽपि उद्घटं प्रवृत्तं अनुमनुते - ([illegible]) [illegible] अनुमति
करणे न दोषत्वं । ([illegible]) अनुमन्तृत्वं द्विविधं - सनिर्वेदं । विशिष्य अपरावर्तनं
(प्रथमप्रवृत्तौ - कर्म प्रयोजकं -)

2) ब्राह्म्यधिकरणं - अपहतपाप्मत्वादीनां तत्क्रतुन्यायादेव सिद्धेः (एक आत्मनः शरीरे भावात् - व्यतिरेकस्तद्भावभावित्वात्
न तूपलब्धिवत् इत्यत्र स्वात्मशरीरक परमात्मोपासने स्वात्मनः गुणाष्टकविशिष्टत्वेनोपासितत्वात् एव सिद्धत्वात् कुतः
जैमिनिमतग्रहणमत्रेति । तत्र गुणादीनामेव उपास्यत्वं - अतः मुक्तौ जडस्वरूपे आत्मनि गुणाष्टकाविर्भावः जैमिनि-
मतं इति स्वरूपस्य जडत्वस्थापनं । तर्हि पूर्वत्र सम्पद्याविर्भावाधिकरणे उभयरूपाविर्भावः उक्तः किल । अतः
जैमिनि (गुणे गुणाभावात् - जड एव गुणः) अतद्दौर्लभ्य (जैमिनिमुखेन) सिद्धान्त्यते । विज्ञानघन एव अत्रायेऽयमात्मा इति
स्वरूपमात्राविर्भावः औडुलोमिमतं । अत्र अवधारणेन व्यावर्त्यं किं? न तु अपहतपाप्मादिकं मात्र अपितु ज्ञानगुणक -
त्वमपि ([illegible]) अत एव स्वरूपमात्राविर्भावे उक्त सिद्धान्ते एवकारस्य अर्थः किं? अत्र अन्ययोग व्यवच्छेदः पूर्वपक्षे
अयोगव्यवच्छेदः सिद्धान्ते - लवणखण्डे रसघन एव इत्युक्ते - रूपस्पर्शादि सद्भावनिषेधाभाववत् -
अत्र कृत्स्नत्वेन - आत्मनि कृत्स्नांशज्ञानघनत्वं - सांशत्वं - अत्र - काल भेदेन [illegible] (Mp - सर्वावस्थायां
सर्वत्रापि विज्ञानघनत्वं इति ॥

असत्यात् - शास्त्रात् - सत्यं - ब्रह्म सिध्यति । स्फोटात् - असत्यात् - सत्यं - स्फोटं ब्रह्म सिध्यतीति
3) जिज्ञासाधिकरणं - अद्वैतिनः - वैयाकरणाः स्फोटवादिनः । स्फोटवादनिषेधः । उपोद्घातः - इति वदन्ति ।
असत्यात्सत्यवादिनः ↓ " वैयाकरणानुमतिं प्रमाणयन्ति । अर्थप्रकाशकत्वं - स्फोटत्वं, स्फुटो भवति ।
अष्टविधस्फोट मध्ये वाक्यस्फोटं सम्राजं वर्णयन् तेन शब्दबोधात् (ज्ञानात्) मुक्तिं सिद्धान्तयन्ति ॥
पदेन वर्णा विद्यन्ते - वर्णसमुदाये एव अर्थः । महाभाष्ये - नित्याः कार्याश्च वर्णाः । वर्णो
Mp जिज्ञासाधिकरणे स्फोटवादस्य का प्रसक्तिः? स्फोटवादी ब्रह्मजिज्ञासां निरुणद्धि वा? सिद्धान्तं खण्डयति नेति यावत् ।
अत्र शब्दमेव ब्रह्मेति सः वदति । शब्दब्रह्मणि निष्णातः परब्रह्माधिगच्छति (शब्दे ब्रह्मणि) तत शब्दविचारः कर्तव्य इति वा?
स्फुटति → अर्थनिष्ठ विषयता निरूपित शक्तिमत्त्वं स्फोटत्वं ॥ अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् - विवर्ततेऽर्थभावेन -
अतः वैयाकरणाः अपि विवर्तवादिन एवेति । अरणिस्थो यथा ज्योतिः अन्यथा [illegible] । शब्दानिष्ठस्तथा स्फोटः इति
[illegible] - अ - विष्णुः, उ - लक्ष्मीः अत्र वर्णस्फोटः (काल्पनिकः), न वाक्यस्फोटः, अ भवति इत्युक्ते शब्दबोधः अतैव वाक्यस्फोटः
उत्तमत्वं स्यात् । शब्दशब्दसान्यत्वं - [illegible] साक्षा निषादीनां प्रतीतिः येनोच्चारितेन स इति न आकृतेः, पद, अर्थ त्रयः
शब्दः द्रव्यः - श्रोत्रग्राह्यः प्रयोगेण अभिव्यङ्ग्यः आकाश प्रदेशः शब्दः । उपवर्षः (अतिप्राचीनः) = गौरित्यत्र कः शब्दः -
आकारौकारविसर्जनीयाः - वर्णस्यैवोच्चारणं - न सादृश्य ।
वैयाकरणाः जीवं अभ्युपयन्ति । प्रक्रियारूप शब्दज्ञानानुभवं साधनः अतैव अनुग्राह्यः । वाक्यपदीये - आध्यात्मिक
विचारं न पृथक्करोति । तथापि - अद्वैतमार्गानुसारी तत्त्वक्रमः ।

4) शुगस्याधिकरणं -

5) सर्वान्नानुमत्यधिकरणं - सर्वान्नानुमतिः - विग्रहः - सर्वं च तत् अन्नं च सर्वान्नं, तस्य, तस्मिन् वा अनुमतिः ।
(आत्यान्तिकनिमित्तम्) शास्त्रनिषिद्ध, अनिषिद्धं - प्राणब्रह्म विद्यानिष्ठस्य उपे लशुन पलाण्डु भक्षणे अनुमतिर्वा →
महता अत्यायने अर्थं भवति नाजन्नं परिगृहीतं भवति । अन्नं सर्वदा वा प्राणात्यये नेत्येव संशयः । Mp एतत्तस्यैव वा सर्वविद्यो -
पासकानां कथं? कुल्माषः (Mansha) [illegible] - कुल्माषः निषिद्धं वा
तद्दर्शनात् - इति दृष्टान्तः प्राणविद्यानिष्ठस्य - ब्रह्मविद्यानिष्ठस्यापि प्राणात्यय एवेत्युक्ते - किं पुनः प्राणविद्यानिष्ठस्य ?

6) स्वाम्यधिकरणं - यजेत स्वर्गकामः Mp इति कस्य विधिः? कर्तृत्व सद्भावात् विधिरिति चेत्, यजमानः किं करोति?
आर्त्विज्यकर्म - देवतोद्देशेन द्रव्यत्यागः न तु हविः प्रक्षेपः याग - तन्तु उद्देश्य त्यागः, अङ्गन्यास - अङ्गविकरणं,
इत्यादिरूपं । (प्रकान्ति काण्डोक्ता ये उद्गीथविषया यजमानकर्तृकाः नेत्या) ते सत्या: आर्त्विज्यमवस्थितकार्याः ॥)

25/8 (1) पुरुषविद्याधिकरणं – कः ब्रह्मविद्यायामधिकारी ? → मुमुक्षुः अन्योऽपि वा, उत आद्य एव । आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ – पुरुषो वाव यज्ञः – एतद्विद्यानुष्ठाता किं फलाकांक्षी ? आयुःप्राप्तिकामः ऐहिक फलकत्वस्य – आमुष्मिक फलकत्वस्य च मंत्रस्य सत्त्वात् – पुरुषविद्यायाः विद्याभेदात् गुणानुपसंहारः – [illegible] → मुमुक्षुः पुरुषविद्यां अनुतिष्ठेत न वा ? यदि ऐहिकफल साधकैव, तर्हि कथं ब्रह्मविद्यात्वं ? स्वतन्त्रा ब्रह्मविद्या ऐहिक फलसाधका –

(2) दक्षिणायनाधिकरणं – अतश्चायनेऽपि दक्षिणे → अत्र पूर्वपक्षी (दक्षिणायने मृतस्य मुक्तिवारक कः ?) अर्चिरादि गतौ – स एनान् ब्रह्म गमयति – इदं निरवधारणं इति कथं इतरेषां तद्बाधः ?

अत एवेत्यतिदेशरूपबाधाधिकारांकापेक्षत्वं । अधिकाराशङ्का । ननु – दक्षिणे प्रमीयते – चन्द्रमसः सायुज्यं गच्छति – (विपरीत तु गतिं – ?) अन्यथा ऽऽवर्तते पुनः ' योगी प्राप्य निवर्तते ' भीष्मादीनां उत्तरायण प्रतीक्षा च हेतुः । एतमेवाध्वानं पुनर्निवर्तन्ते → महापितॄणामेव महिमान गत्वा →

[ अत्र उत्तरायणमृतस्यापि आदित्यसायुज्यं गच्छतः कुतः ब्रह्मप्राप्तिर्निवार्यते ? यदि चन्द्रमसः सायुज्यं धूमादिमार्गगं चन्द्रप्रत्यभिज्ञापकं यत् आवृत्तिशङ्का त्याज्यं ] ?

(3) अत्त्राधिकरणं – यस्य ब्रह्म च क्षत्रं च इत्यस्य पूर्वपक्षाशये किं रूपं ओदनत्वं ? किं वा तत् ? [illegible] अत्र ब्रह्म क्षत्र शब्देन – कतिपय – सर्वे वा गृह्यन्ते ? अनुभाष्यत्वेन – पश्यति – जीवसमुदायं वा ? जीवविशेषो वा ? यस्य – जात्येकवचनं – उपास्यत्व जीवस्य क्षत्रशब्दः क्षत्रिये, ब्रह्म शब्दश्च – ब्राह्मणे नावगम्यतः । मृत्युः उपसेचनं किं ?

अबाधकं – नाके ? साधकमपि स्यादेव हि उपसेचनं – अत्र – उपसेचनं – कर्म ? इति → ब्रह्म क्षत्र – निखिल चराचरार्थकं कथं ? ओदनं नाम → नश्वरं मृत्योः उपसेचनत्वात् → स्वयमद्यमानं सत् अदनहेतुः → अतः लभ्यते निखिलचराचरत्वं अत्ता – भोक्तृत्वयुक्ते का क्षतिः ? कुतः संहर्तृत्वं [illegible] – अतः भोक्तृत्वं कुतः केशानि मत अभोक्तृत्ववादे दोषः वक्तव्यः → [illegible] पूर्वपक्षविघटकत्वं [illegible] ( [illegible] → जगत्कारणत्व, समन्वयाध्याये → कर्तृत्वरूप भोक्तृत्वे न दोषः) ( संहारकरणं, भोजनकारणत्वमपि सङ्गतमेव ) [illegible] – अत्र अन्तर्गतवस्तूनां न नाशः – अत्र चराचराणां नाशात् – न भोक्तृत्वं – अपि तु संहर्तृत्वं → [illegible] ( काकेभ्यो दधि रक्ष्यतां इत्युक्ते, बिडालेभ्यः ? – उपलक्षणं ) ( क्षतात्त्रायते – क्षत्रं → ) ब्रह्म च क्षत्रं च – अत्र चकारद्वयेन – इतर ग्रहणं –

(4) अर्थान्तरत्वाधिकरणं → पूर्वपक्षे किं ? नामरूपयोर्निर्वहिता मुक्तः कथं भवति ? ब्रह्म पूर्वावस्थायां इति → येन आकाशे किं ?

75 आकाशस्त्वलिङ्गात् – अत्र निर्दिष्टाकाशात् अन्यत्वं आकाशः भिन्नं अभिन्नं ? (तत्र आकाशादेव समुत्पद्यन्ते – अत्र नामरूपयोर्निर्वहिता ?) स्वेतरवस्तूनां नामरूपयोर्निर्वहिता → आकाशस्याचेतनत्वात् असङ्गतिः अतः न भूताकाशत्वं, परमात्मनः नामरूप संबन्धाभावात् निर्वोढा मुक्तोऽति पूर्वपक्षः । निर्वहिता – कथं व्याकर्ता ? → वोढृत्वं – घञ् प्रत्ययकत्वात् → कर्तृकर्मोभय विषयकमिति – पूर्वोत्तरपक्षसाङ्कर्यं । ते यदन्तरा – ताभ्यां पृथक्तया वर्तते । तस्यैव – आकाशत्वनामकत्वं कथं सङ्गच्छेत ? इन्द्रो मायाभिः देवताः – अप एव ससर्जादौ – आदि →

(6) विध्यर्थविचारः – तार्किकानां – इष्टसाधनत्व, कृतिसाध्यत्व, बलवदनिष्टाननुबन्धित्वं → चैत्रः पचेत → भूमौ मण्डलं कुरु – चन्द्रं स्पृश – कुण्डलीकरणे – [illegible] विषमिश्रं अन्नं भुङ्क्ष्व । भाट्टाः – एतत् नानुमन्यन्ते → आचार्येण नियुक्तः बालः नैव दृश्यं – गामानयेत्युक्ते → शिष्य प्रवृत्ति दर्शनात् → [illegible] अत्र प्रवृत्त्यैव – बलवदनिष्टाननुबन्धित्वं ऊहते । कूपे पतति चेत् ? → अत्र इष्टसाधनत्वं, बलवदनिष्टाननुबन्धित्वं एतयोः विशेषः किं ? इष्ट कारणकार्यभाव दोषाः → शङ्कुर्वन्ति तार्किकाः गौरवः मीमांसकाः चलनार्थैव । शक्त्या – अर्थलाभो नैयायिकानां ; मीमांसकानां अनुमेयं – विलम्बितं ... शाब्दबोधः – गौणः, द्रुतं प्रवक्तृ ) दुर्बलं

आर्थी भावनायां – किं, केन, कथं – शाब्दी भावना – तयैव अनुमीयते, कृतं

(5) तदधिगमाधिकरणं – नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि → कथं शरणागतौ कर्मनाशः ? [illegible] हानौ संक्रम द्वारा → भक्तस्यापि – न क्षीयते – संक्रम दर्शनात् – तद्विपदाऽनु भूयत इति – कृच्छ्रादिषु कथं विनाशः दक्षिणया तत्स्वीकर्तुः ? [illegible] सङ्क्रमः प्रपन्नान्तरेऽप्यस्ति । अत्र, प्रपन्नान्तरस्य ब्रह्मविदः विषये सङ्क्रमः नाभ्युपगन्तव्यः । यतः सर्वविषयेऽपि सुहृदः दुष्कृत सङ्क्रमः नास्ति । एवं ब्रह्मविदोऽपि सुहृदः पुण्यपाप फल सुकृत दुष्कृतयोः उभयोरपि दुष्कृतप्रायत्वात्, दुष्कृतस्य सुहृत्प्राप्तेः ब्रह्मवित् सङ्क्रम कर्मैव न भवतीति वक्तव्यमिति ।